॥ श्रीहरिः ॥

2021

पुरुषोत्तमसहस्त्रनामस्तोत्रम्

[नामावलीसहितम्]

गीताप्रेस, गोरखपुर

पुरुषोत्तमसहस्त्रनामस्तोत्रम्

पुराणपुरुषो विष्णुः पुरुषोत्तम उच्यते।
नाम्नां सहस्त्रं वक्ष्यामि तस्य भागवतोद्धृतम्॥ १ ॥

(एतन्माहात्म्यम्)

यस्य प्रसादाद्वागीशाः प्रजेशा विभवोन्नताः।
क्षुद्रा अपि भवंत्याशु श्रीकृष्णं तं नतोऽस्म्यहम्॥ २ ॥
अनन्ता एव कृष्णस्य लीला नामप्रवर्तिकाः।
उक्ता भागवते गूढाः प्रकटा अपि कुत्रचित्॥ ३ ॥
अतस्तानि प्रवक्ष्यामि नामानि मुरवैरिणः
सहस्त्रं यैस्तु पठितैः पठितं स्याच्छुकामृतम्॥ ४ ॥

(ऋष्यादयः)

कृष्णनामसहस्त्रस्य ऋषिरग्निर्निरूपितः।
गायत्री च तथा छन्दो देवता पुरुषोत्तमः॥ ५ ॥
विनियोगः समस्तेषु पुरुषार्थेषु वै मतः।
बीजं भक्तप्रियः शक्तिः सत्यवागुच्यते हरिः॥ ६ ॥
भक्तोद्धरणयत्नस्तु मन्त्रोऽत्र परमो मतः।
अवतारितभक्तांशः कीलकं परिकीर्तितम्॥ ७ ॥
अस्त्रं सर्वसमर्थश्च गोविन्दः कवचं मतम्।
पुरुषो ध्यानमत्रोक्तं सिद्धिः शरणसंस्मृतिः॥ ८ ॥

सहस्त्रनामस्तोत्रम्

(अथ प्रथमस्कन्धीयनामानि)

श्रीकृष्णः सच्चिदानन्दो नित्यलीलाविनोदकृत्।
सर्वागमविनोदी च लक्ष्मीशः पुरुषोत्तमः॥ ९ ॥
आदिकालः सर्वकालः कालात्मा माययावृतः।
भक्तोद्धारप्रयत्नात्मा जगत्कर्ता जगन्मयः॥ १०॥

नामलीलापरो विष्णुर्व्यासात्मा शुकमोक्षदः।
व्यापिवैकुण्ठदाता च श्रीमद्भागवतागमः॥ ११॥
शुकवागमृताब्धीन्दुः शौनकाद्यखिलेष्टदः।
भक्तिप्रवर्तकस्त्राता व्यासचिन्ताविनाशकः॥ १२॥
सर्वसिद्धान्तवागात्मा नारदाद्यखिलेष्टदः।
अन्तरात्मा ध्यानगम्यो भक्तिरत्नप्रदायकः॥ १३॥
मुक्तोपसृप्यः पूर्णात्मा मुक्तानां रतिवर्धनः।
भक्तकार्यैकनिरतो द्रौण्यस्त्रविनिवारकः॥ १४॥
भक्तस्मयप्रणेता च भक्तवाक्परिपालकः।
ब्रह्मण्यदेवो धर्मात्मा भक्तानां च परीक्षकः॥ १५॥
आसन्नहितकर्ता च मायाहितकरः प्रभुः।
उत्तराप्राणदाता च ब्रह्मास्त्रविनिवारकः॥ १६॥
सर्वतः पाण्डवपतिः परीक्षिच्छुद्धिकारणम्।
गूढात्मा सर्ववेदेषु भक्तैकहृदयङ्गमः॥ १७॥
कुन्तीस्तुत्यः प्रसन्नात्मा परमाद्भुतकार्यकृत्।
भीष्ममुक्तिप्रदः स्वामी भक्तमोहनिवारकः॥ १८॥
सर्वावस्थासु संसेव्यः समः सुखहितप्रदः।
कृतकृत्यः सर्वसाक्षी भक्तश्रीरतिवर्धनः॥ १९॥
सर्वसौभाग्यनिलयः परमाश्चर्यरूपधृक्।
अनन्यपुरुषस्वामी द्वारकाभाग्यभाजनम्॥ २०॥
बीजसंस्कारकर्ता च परीक्षिज्ज्ञानपोषकः।
सर्वत्र पूर्णगुणकः सर्वभूषणभूषितः॥ २१॥
सर्वलक्षणदाता च धृतराष्ट्रविमुक्तिदः।
सन्मार्गरक्षको नित्यं विदुरप्रीतिपूरकः॥ २२॥

लीलाव्यामोहकर्ता च कालधर्मप्रवर्तकः ।
पाण्डवानां मोक्षदाता परीक्षिद्भाग्यवर्धनः ॥ २३ ॥
कलिनिग्रहकर्ता च धर्मादीनां च पोषकः ।
सत्सङ्गज्ञानहेतुश्च श्रीभागवतकारणम् ॥ २४ ॥
प्राकृतादृष्टमार्गश्च श्रोतव्यः सकलागमैः ।

(द्वितीयस्कन्धीयनामानि)

कीर्तितव्यः शुद्धभावैः स्मर्तव्यश्चात्मवित्तमैः ॥ २५ ॥
अनेकमार्गकर्ता च नानाविधगतिप्रदः ।
पुरुषः सकलाधारः सत्त्वैकनिलयात्मभूः ॥ २६ ॥
सर्वध्येयो योगगम्यो भक्तिग्राह्यः सुरप्रियः ।
जन्मादिसार्थककृतिर्लीलाकर्ता पतिः सताम् ॥ २७ ॥
आदिकर्ता सत्त्वकर्ता सर्वकर्ता विशारदः ।
नानावतारकर्ता च ब्रह्माविर्भावकारणम् ॥ २८ ॥
दशलीलाविनोदी च नानासृष्टिप्रवर्तकः ।
अनेककल्पकर्ता च सर्वदोषविवर्जितः ॥ २९ ॥

(तृतीयस्कन्धीयनामानि)

वैराग्यहेतुस्तीर्थात्मा सर्वतीर्थफलप्रदः ।
तीर्थशुद्धैकनिलयः स्वमार्गपरिपोषकः ॥ ३० ॥
तीर्थकीर्तिर्भक्तगम्यो भक्तानुशयकार्यकृत् ।
भक्ततुल्यः सर्वतुल्यः स्वेच्छासर्वप्रवर्तकः ॥ ३१ ॥
गुणातीतोऽनवद्यात्मा सर्गलीलाप्रवर्तकः ।
साक्षात्सर्वजगत्कर्ता महदादिप्रवर्तकः ॥ ३२ ॥
मायाप्रवर्तकः साक्षी मायारतिविवर्धनः ।
आकाशात्मा चतुर्मूर्तिश्चतुर्धाभूतभावनः ॥ ३३ ॥

रजःप्रवर्तको ब्रह्मा मरीच्यादिपितामहः ।
वेदकर्ता यज्ञकर्ता सर्वकर्ताऽमितात्मकः ॥ ३४ ॥
अनेकसृष्टिकर्ता च दशधासृष्टिकारकः ।
यज्ञाङ्गो यज्ञवाराहो भूधरो भूमिपालकः ॥ ३५ ॥
सेतुर्विधरणो जैत्रो हिरण्याक्षान्तकः सुरः ।
दितिकश्यपकामैकहेतुसृष्टिप्रवर्तकः ॥ ३६ ॥
देवाभयप्रदाता च वैकुण्ठाधिपतिर्महान् ।
सर्वगर्वप्रहारी च सनकाद्यखिलार्थदः ॥ ३७ ॥
सर्वाश्वासनकर्ता च भक्ततुल्याहवप्रदः ।
काललक्षणहेतुश्च सर्वार्थज्ञापकः परः ॥ ३८ ॥
भक्तोन्नतिकरः सर्वप्रकारसुखदायकः ।
नानायुद्धप्रहरणो ब्रह्मशापविमोचकः ॥ ३९ ॥
पुष्टिसर्गप्रणेता च गुणसृष्टिप्रवर्तकः ।
कर्दमेष्टप्रदाता च देवहूत्यखिलार्थदः ॥ ४० ॥
शुक्लनारायणः सत्यः कालधर्मप्रवर्तकः ।
ज्ञानावतारः शान्तात्मा कपिलः कालनाशकः ॥ ४१ ॥
त्रिगुणाधिपतिः सांख्यशास्त्रकर्ता विशारदः ।
सर्गदूषणहारी च पुष्टिमोक्षप्रवर्तकः ॥ ४२ ॥
लौकिकानन्ददाता च ब्रह्मानन्दप्रवर्तकः ।
भक्तिसिद्धान्तवक्ता च सगुणज्ञानदीपकः ॥ ४३ ॥
आत्मप्रदः पूर्णकामो योगात्मा योगभावितः ।
जीवन्मुक्तिप्रदः श्रीमाननन्यभक्तिप्रवर्तकः ॥ ४४ ॥
कालसामर्थ्यदाता च कालदोषनिवारकः ।
गर्भोत्तमज्ञानदाता कर्ममार्गनियामकः ॥ ४५ ॥

सर्वमार्गनिराकर्ता भक्तिमार्गैकपोषकः ।
सिद्धिहेतुः सर्वहेतुः सर्वाश्चर्यैककारणम् ॥ ४६ ॥
चेतनाचेतनपतिः समुद्रपरिपूजितः ।
सांख्याचार्यस्तुतः सिद्धपूजितः सर्वपूजितः ॥ ४७ ॥

(चतुर्थस्कन्धीयनामानि)

विसर्गकर्ता सर्वेशः कोटिसूर्यसमप्रभः ।
अनन्तगुणगम्भीरो महापुरुषपूजितः ॥ ४८ ॥
अनन्तसुखदाता च ब्रह्मकोटिप्रजापतिः ।
सुधाकोटिस्वास्थ्यहेतुः कामधुक्कोटिकामदः ॥ ४९ ॥
समुद्रकोटिगम्भीरस्तीर्थकोटिसमाह्वयः ।
सुमेरुकोटिनिष्कम्पः कोटिब्रह्माण्डविग्रहः ॥ ५० ॥
कोट्यश्वमेधपापघ्नो वायुकोटिमहाबलः ।
कोटीन्दुजगदानन्दी शिवकोटिप्रसादकृत् ॥ ५१ ॥
सर्वसद्गुणमाहात्म्यः सर्वसद्गुणभाजनम् ।
मन्वादिप्रेरको धर्मो यज्ञनारायणः परः ॥ ५२ ॥
आकूतिसूनुर्देवेन्द्रो रुचिजन्माभयप्रदः ।
दक्षिणापतिरोजस्वी क्रियाशक्तिः परायणः ॥ ५३ ॥
दत्तात्रेयो योगपतियोगमार्गप्रवर्तकः ।
अनसूयागर्भरत्नमृषिवंशविवर्धनः ॥ ५४ ॥
गुणत्रयविभागज्ञश्चतुर्वर्गविशारदः ।
नारायणो धर्मसूनुर्मूर्तिपुण्ययशस्करः ॥ ५५ ॥
सहस्त्रकवचच्छेदी तपःसारो नरप्रियः ।
विश्वानन्दप्रदः कर्मसाक्षी भारतपूजितः ॥ ५६ ॥
अनन्ताद्भुतमाहात्म्यो बदरीस्थानभूषणम् ।
जितकामो जितक्रोधो जितसङ्गो जितेन्द्रियः ॥ ५७ ॥

उर्वशीप्रभवः स्वर्गसुखदायी स्थितिप्रदः ।
अमानी मानदो गोप्ता भगवच्छास्त्रबोधकः ॥ ५८ ॥
ब्रह्मादिवन्द्यो हंसः श्रीर्मायावैभवकारणम् ।
विविधानन्तसर्गात्मा विश्वपूरणतत्परः ॥ ५९ ॥
यज्ञजीवनहेतुश्च यज्ञस्वामीष्टबोधकः ।
नानासिद्धान्तगम्यश्च सप्ततन्तुश्च षड्गुणः ॥ ६० ॥
प्रतिसर्गजगत्कर्ता नानालीलाविशारदः ।
ध्रुवप्रियो ध्रुवस्वामी चिन्तिताधिकदायकः ॥ ६१ ॥
दुर्लभानन्तफलदो दयानिधिरमित्रहा ।
अङ्गस्वामी कृपासारो वैन्यो भूमिनियामकः ॥ ६२ ॥
भूमिदोग्धा प्रजाप्राणपालनैकपरायणः ।
यशोदाता ज्ञानदाता सर्वधर्मप्रदर्शकः ॥ ६३ ॥
पुरञ्जनो जगन्मित्रं विसर्गान्तप्रदर्शकः ।
प्रचेतसां पतिश्चित्रभक्तिहेतुर्जनार्दनः ॥ ६४ ॥
स्मृतिहेतुर्ब्रह्मभावसायुज्यादिप्रदः शुभः ।

(पञ्चमस्कन्धीयनामानि)

विजयी स्थितिलीलाब्धिरच्युतो विजयप्रदः ॥ ६५ ॥
स्वसामर्थ्यप्रदो भक्तकीर्तिहेतुरधोक्षजः ।
प्रियव्रतप्रियस्वामी स्वेच्छावादविशारदः ॥ ६६ ॥
सङ्ख्यागम्यः स्वप्रकाशः सर्वसङ्गविवर्जितः ।
इच्छायां च समर्यादस्त्यागमात्रोपलम्भनः ॥ ६७ ॥
अचिन्त्यकार्यकर्ता च तर्कागोचरकार्यकृत् ।
शृङ्गाररसमर्यादा आग्नीध्ररसभाजनम् ॥ ६८ ॥
नाभीष्टपूरकः कर्ममर्यादादर्शनोत्सुकः ।
सर्वरूपोऽद्भुततमो मर्यादापुरुषोत्तमः ॥ ६९ ॥

सर्वरूपेषु सत्यात्मा कालसाक्षी शशिप्रभः।
मेरुदेवीव्रतफलमृषभो भगलक्षणः॥ ७०॥
जगत्सन्तर्पको मेघरूपी देवेन्द्रदर्पहा।
जयन्तीपतिरत्यन्तप्रमाणाशेषलौकिकः॥ ७१॥
शतधान्यस्तभूतात्मा शतानन्दो गुणप्रसूः।
वैष्णवोत्पादनपरः सर्वधर्मोपदेशकः॥ ७२॥
परहंसक्रियागोप्ता योगचर्याप्रदर्शकः।
चतुर्थाश्रमनिर्णेता सदानन्दशरीरवान्॥ ७३॥
प्रदर्शितान्यधर्मश्च भरतस्वाम्यपारकृत्।
यथावत्कर्मकर्ता च सङ्गानिष्टप्रदर्शकः॥ ७४॥
आवश्यकपुनर्जन्मकर्ममार्गप्रदर्शकः।
यज्ञरूपमृगः शान्तः सहिष्णुः सत्पराक्रमः॥ ७५॥
रहूगणगतिज्ञश्च रहूगणविमोचकः।
भवाटवीतत्त्ववक्ता बहिर्मुखहिते रतः॥ ७६॥
गयस्वामी स्थानवंशकर्ता स्थानविभेदकृत्।
पुरुषावयवो भूमिविशेषविनिरूपकः॥ ७७॥
जम्बूद्वीपपतिर्मेरुनाभिपद्मरुहाश्रयः।
नानाविभूतिलीलाढ्यो गङ्गोत्पत्तिनिदानकृत्॥ ७८॥
गङ्गामाहात्म्यहेतुश्च गङ्गारूपोऽतिगूढकृत्।
वैकुण्ठदेहहेत्वम्बुजन्मकृत्सर्वपावनः॥ ७९॥
शिवस्वामी शिवोपास्यो गूढः सङ्कर्षणात्मकः।
स्थानरक्षार्थमत्स्यादिरूपः सर्वैकपूजितः॥ ८०॥
उपास्यनानारूपात्मा ज्योतीरूपो गतिप्रदः।
सूर्यनारायणो वेदकान्तिरुज्ज्वलवेषधृक्॥ ८१॥

हंसोऽन्तरिक्षगमनः सर्वप्रसवकारणम्।
आनन्दकर्ता वसुदो बुधो वाक्पतिरुज्ज्वलः॥ ८२॥
कालात्मा कालकालश्च कालच्छेदकृदुत्तमः।
शिशुमारः सर्वमूर्तिराधिदैविकरूपधृक्॥ ८३॥
अनन्तसुखभोगाढ्यो विवरैश्वर्यभाजनम्।
सङ्कर्षणो दैत्यपतिः सर्वाधारो बृहद्वपुः॥ ८४॥
अनन्तनरकच्छेदी स्मृतिमात्रार्तिनाशनः।
सर्वानुग्रहकर्ता च मर्यादाभिन्नशास्त्रकृत्॥ ८५॥

(षष्ठस्कन्धीयनामानि)

कालान्तकभयच्छेदी नामसामर्थ्यरूपधृक्।
उद्धारानर्हगोप्त्रात्मा नामादिप्रेरकोत्तमः॥ ८६॥
अजामिलमहादुष्टमोचकोऽघविमोचकः।
धर्मवक्ताक्लिष्टवक्ता विष्णुधर्मस्वरूपधृक्॥ ८७॥
सन्मार्गप्रेरको धर्ता त्यागहेतुरधोक्षजः।
वैकुण्ठपुरनेता च दाससंवृद्धिकारकः॥ ८८॥
दक्षप्रसादकृद्धंसगुह्यस्तुतिविभावनः।
स्वाभिप्रायप्रवक्ता च मुक्तजीवप्रसूतिकृत्॥ ८९॥
नारदप्रेरणात्मा च हर्यश्वब्रह्मभावनः।
शबलाश्वहितो गूढवाक्यार्थज्ञापनक्षमः॥ ९०॥
गूढार्थज्ञापकः सर्वमोक्षानन्दप्रतिष्ठितः।
पुष्टिप्ररोहहेतुश्च दासैकज्ञातहृद्गतः॥ ९१॥
शान्तिकर्ता सुहितकृत्स्त्रीप्रसूः सर्वकामधुक्।
पुष्टिवंशप्रणेता च विश्वरूपेष्टदेवता॥ ९२॥
कवचात्मा पालनात्मा वर्मोपचितिकारणम्।
विश्वरूपशिरश्छेदी त्वाष्ट्रयज्ञविनाशकः॥ ९३॥

वृत्रस्वामी वृत्रगम्यो वृत्रव्रतपरायणः ।
वृत्रकीर्तिर्वृत्रमोक्षो मघवत्प्राणरक्षकः ॥ १४ ॥
अश्वमेधहविर्भोक्ता देवेन्द्रामीवनाशकः ।
संसारमोचकश्चित्रकेतुबोधनतत्परः ॥ १५ ॥
मन्त्रसिद्धिः सिद्धिहेतुः सुसिद्धिफलदायकः ।
महादेवतिरस्कर्ता भक्तपूर्वार्थनाशकः ॥ १६ ॥
देवब्राह्मणविद्वेषवैमुख्यज्ञापकः शिवः ।
आदित्यो दैत्यराजश्च मरुत्पतिरचिन्त्यकृत् ॥ १७ ॥
मरुतां भेदकस्त्राता व्रतात्मा पुंप्रसूतिकृत् ।

(सप्तमस्कन्धीयनामानि)

कर्मात्मा वासनात्मा च ऊतिलीलापरायणः ॥ १८ ॥
समदैत्यसुरः स्वात्मा वैषम्यज्ञानसंश्रयः ।
देहाद्युपाधिरहितः सर्वज्ञः सर्वहेतुवित् ॥ १९ ॥
ब्रह्मवाक्स्थापनपरः स्वजन्मावधिकार्यकृत् ।
सदसद्वासनाहेतुस्त्रिसत्यो भक्तमोचकः ॥ १०० ॥
हिरण्यकशिपुद्वेषी प्रविष्टात्मातिभीषणः ।
शान्तिज्ञानादिहेतुश्च प्रह्लादोत्पत्तिकारणम् ॥ १०१ ॥
दैत्यसिद्धान्तसद्वक्ता तपःसार उदारधीः ।
दैत्यहेतुप्रकटनो भक्तिचिह्नप्रकाशकः ॥ १०२ ॥
सद्द्वेषहेतुः सद्द्वेषवासनात्मा निरन्तरः ।
नैष्ठुर्यसीमा प्रह्लादवत्सलः सङ्गदोषहा ॥ १०३ ॥
महानुभावः साकारः सर्वाकारः प्रमाणभूः ।
स्तम्भप्रसूतिर्नृहरिर्नृसिंहो भीमविक्रमः ॥ १०४ ॥
विकटास्यो ललज्जिह्वो नखशस्त्रो जवोत्कटः ।
हिरण्यकशिपुच्छेदी क्रूरदैत्यविनाशकः ॥ १०५ ॥

सिंहासनस्थः क्रोधात्मा लक्ष्मीभयविवर्धनः ।
ब्रह्माद्यत्यन्तभयभूरपूर्वाचिन्त्यरूपधृक् ॥ १०६ ॥
भक्त्यैककशान्तहृदयो भक्तस्तुत्यः स्तुतिप्रियः ।
भक्ताङ्गलेहनोद्धूतक्रोधपुञ्जप्रशान्तधीः ॥ १०७ ॥
स्मृतिमात्रभयत्राता ब्रह्मबुद्धिप्रदायकः ।
गोरूपधार्यमृतपाः शिवकीर्तिविवर्धनः ॥ १०८ ॥
धर्मात्मा सर्वकर्मात्मा विशेषात्माश्रयप्रभुः ।
संसारमग्नस्वोद्धर्ता सन्मार्गाखिलतत्त्ववाक् ॥ १०९ ॥
आचारात्मा सदाचारो मन्वन्तरविभावनः ।

(अष्टमस्कन्धीयनामानि)

स्मृत्याशेषाशुभहरो गजेन्द्रस्मृतिकारणम् ॥ ११० ॥
जातिस्मरणहेत्वेकपूजाभक्तिस्वरूपदः ।
यज्ञो भयान्मनुत्राता विभुर्ब्रह्मव्रताश्रयः ॥ १११ ॥
सत्यसेनो दुष्टघाती हरिर्गजविमोचकः ।
वैकुण्ठो लोककर्ता च अजितोऽमृतकारणम् ॥ ११२ ॥
उरुक्रमो भूमिहर्ता सार्वभौमो बलिप्रियः ।
विभुः सर्वहितैकात्मा विष्वक्सेनः शिवप्रियः ॥ ११३ ॥
धर्मसेतुर्लोकधृतिः सुधर्मान्तरपालकः ।
उपहर्ता योगपतिर्बृहद्भानुः क्रियापतिः ॥ ११४ ॥
चतुर्दशप्रमाणात्मा धर्मो मन्वादिबोधकः ।
लक्ष्मीभोगैकनिलयो देवमन्त्रप्रदायकः ॥ ११५ ॥
दैत्यव्यामोहकः साक्षाद् गरुडस्कन्धसंश्रयः ।
लीलामन्दरधारी च दैत्यवासुकिपूजितः ॥ ११६ ॥
समुद्रोन्मथनायत्तोऽविघ्नकर्ता स्ववाक्यकृत् ।
आदिकूर्मः पवित्रात्मा मन्दराघर्षणोत्सुकः ॥ ११७ ॥

श्वासैजदब्धिवार्वीचिः कल्पान्तावधिकार्यकृत्।
चतुर्दशमहारत्नो लक्ष्मीसौभाग्यवर्धनः ॥ ११८ ॥
धन्वन्तरिः सुधाहस्तो यज्ञभोक्तार्तिनाशनः।
आयुर्वेदप्रणेता च देवदैत्याखिलार्चितः ॥ ११९ ॥
बुद्धिव्यामोहको देवकार्यसाधनतत्परः।
स्त्रीरूपो मायया वक्ता दैत्यान्तःकरणप्रियः ॥ १२० ॥
पायितामृतदेवांशो युद्धहेतुस्मृतिप्रदः।
मालिसुमालिवधकृन्माल्यवत्प्राणहारकः ॥ १२१ ॥
कालनेमिशिरश्छेदी दैत्ययज्ञविनाशकः।
इन्द्रसामर्थ्यदाता च दैत्यशेषस्थितिप्रियः ॥ १२२ ॥
शिवव्यामोहको मायी भृगुमन्त्रस्वशक्तिदः।
बलिजीवनकर्ता च स्वर्गहेतुर्व्रतार्चितः ॥ १२३ ॥
अदित्यानन्दकर्ता च कश्यपादितिसम्भवः।
उपेन्द्र इन्द्रावरजो वामनो ब्रह्मरूपधृक् ॥ १२४ ॥
ब्रह्मादिसेवितवपुर्यज्ञपावनतत्परः।
याञ्चोपदेशकर्ता च ज्ञापिताशेषसंस्थितिः ॥ १२५ ॥
सत्यार्थप्रेरकः सर्वहर्ता गर्वविनाशकः।
त्रिविक्रमस्त्रिलोकात्मा विश्वमूर्तिः पृथुश्रवाः ॥ १२६ ॥
पाशबद्धबलिः सर्वदैत्यपक्षोपमर्दकः।
सुतलस्थापितबलिः स्वर्गाधिकसुखप्रदः ॥ १२७ ॥
कर्मसम्पूर्तिकर्ता च स्वर्गसंस्थापितामरः।
ज्ञातत्रिविधधर्मात्मा महामीनोऽब्धि संश्रयः ॥ १२८ ॥
सत्यव्रतप्रियो गोप्ता मत्स्यमूर्तिधृतश्रुतिः।
शृंगबद्धधृतक्षोणिः सर्वार्थज्ञापको गुरुः ॥ १२९ ॥

(नवमस्कन्धीयनामानि)

ईशसेवकलीलात्मा सूर्यवंशप्रवर्तकः।
सोमवंशोद्भवकरो मनुपुत्रगतिप्रदः॥ १३०॥
अम्बरीषप्रियः साधुर्दुर्वासागर्वनाशकः।
ब्रह्मशापोपसंहर्ता भक्तकीर्तिविवर्धनः॥ १३१॥
इक्ष्वाकुवंशजनकः सगराद्यखिलार्थदः।
भगीरथमहायत्नो गङ्गाधौताङ्घ्रिपङ्कजः॥ १३२॥
ब्रह्मस्वामी शिवस्वामी सगरात्मजमुक्तिदः।
खट्वाङ्गमोक्षहेतुश्च रघुवंशविवर्धनः॥ १३३॥
रघुनाथो रामचन्द्रो रामभद्रो रघुप्रियः।
अनन्तकीर्तिः पुण्यात्मा पुण्यश्लोकैकभास्करः॥ १३४॥
कोशलेन्द्रः प्रमाणात्मा सेव्यो दशरथात्मजः।
लक्ष्मणो भरतश्चैव शत्रुघ्नो व्यूहविग्रहः॥ १३५॥
विश्वामित्रप्रियो दान्तस्ताटकावधमोक्षदः।
वायव्यास्त्राब्धिनिक्षिप्तमारीचश्च सुबाहुहा॥ १३६॥
वृषध्वजधनुर्भङ्गप्राप्तसीतामहोत्सवः।
सीतापतिर्भृगुपतिगर्वपर्वतनाशकः॥ १३७॥
अयोध्यास्थमहाभोगयुक्तलक्ष्मीविनोदवान्।
कैकेयीवाक्यकर्ता च पितृवाक्परिपालकः॥ १३८॥
वैराग्यबोधकोऽनन्यसात्त्विकस्थानबोधकः।
अहल्यादुःखहारी च गुहस्वामी सलक्ष्मणः॥ १३९॥
चित्रकूटप्रियस्थानो दण्डकारण्यपावनः।
शरभङ्गसुतीक्ष्णादिपूजितोऽगस्त्यभाग्यभूः॥ १४०॥
ऋषिसम्प्रार्थितकृतिर्विराधवधपण्डितः।
छिन्नशूर्पणखानासः खरदूषणघातकः॥ १४१॥

एकबाणहतानेकसहस्त्रबलराक्षसः ।
मारीचघाती नियतसीतासम्बन्धशोभनः ॥ १४२ ॥
सीतावियोगव्यग्रश्च जटायुवधमोक्षदः ।
शबरीपूजितो भक्तहनुमत्प्रमुखावृतः ॥ १४३ ॥
दुन्दुभ्यस्थिप्रहरणः सप्ततालविभेदनः ।
सुग्रीवराज्यदो वालिघाती सागरशोषणः ॥ १४४ ॥
सेतुबन्धनकर्ता च विभीषणहितप्रदः ।
रावणादिशिरश्छेदी राक्षसाघौघनाशकः ॥ १४५ ॥
सीताभयप्रदाता च पुष्पकागमनोत्सुकः ।
अयोध्यापतिरत्यन्तसर्वलोकसुखप्रदः ॥ १४६ ॥
मथुरापुरनिर्माता सुकृतज्ञस्वरूपदः ।
जनकज्ञानगम्यश्च ऐलान्तःप्रकटश्रुतिः ॥ १४७ ॥
हैहयान्तकरो रामो दुष्टक्षत्रविनाशकः ।
सोमवंशहितैकात्मा यदुवंशविवर्धनः ॥ १४८ ॥

(दशमस्कन्धीय-पूर्वार्धनामानि)

परब्रह्मावतरणः केशवः क्लेशनाशनः ।
भूमिभारावतरणो भक्तार्थाखिलमानसः ॥ १४९ ॥
सर्वभक्तनिरोधात्मा लीलानन्तनिरोधकृत् ।
भूमिष्ठपरमानन्दो देवकीशुद्धिकारणम् ॥ १५० ॥
वसुदेवज्ञाननिष्ठसमजीवनिवारकः ।
सर्ववैराग्यकरणस्वलीलाधारसाधकः ॥ १५१ ॥
मायाज्ञापनकर्ता च शेषसम्भारसम्भृतिः ।
भक्तक्लेशपरिज्ञाता तन्निवारणतत्परः ॥ १५२ ॥
आविष्टवसुदेवांशो देवकीगर्भभूषणम् ।
पूर्णतेजोमयः पूर्णः कंसाधृष्यप्रतापवान् ॥ १५३ ॥

विवेकज्ञानदाता च ब्रह्माद्यखिलसंस्तुतः।
सत्यो जगत्कल्पतरुर्नानारूपविमोहनः॥ १५४॥
भक्तिमार्गपतिष्ठता विद्वन्मोहप्रवर्तकः।
मूलकालगुणद्रष्टा नयनानन्दभाजनम्॥ १५५॥
वसुदेवसुखाब्धिश्च देवकीनयनामृतम्।
पितृमातृस्तुतः पूर्वसर्ववृत्तान्तबोधकः॥ १५६॥
गोकुलागतिलीलाप्तवसुदेवकरस्थितिः ।
सर्वेशत्वप्रकटनो मायाव्यत्ययकारकः॥ १५७॥
ज्ञानमोहितदुष्टेशः प्रपञ्चास्मृतिकारणम्।
यशोदानन्दनो नन्दभाग्यभूगोकुलोत्सवः॥ १५८॥
नन्दप्रियो नन्दसूनुर्यशोदायाः स्तनन्धयः।
पूतनासुपयःपाता मुग्धभावातिसुन्दरः॥ १५९॥
सुन्दरीहृदयानन्दो गोपीमन्त्राभिमन्त्रितः।
गोपालाश्चर्यरसकृत् शकटासुरखण्डनः॥ १६०॥
नन्दव्रजजनानन्दी नन्दभाग्यमहोदयः।
तृणावर्तवधोत्साहो यशोदाज्ञानविग्रहः॥ १६१॥
बलभद्रप्रियः कृष्णः सङ्कर्षणसहायवान्।
रामानुजो वासुदेवो गोष्ठाङ्गणगतिप्रियः॥ १६२॥
किङ्किणीरवभावज्ञो वत्सपुच्छावलम्बनः।
नवनीतप्रियो गोपीमोहसंसारनाशकः॥ १६३॥
गोपबालकभावज्ञश्चौर्यविद्याविशारदः ।
मृत्सनाभक्षणलीलास्यमाहात्म्यज्ञानदायकः ॥ १६४॥
धराद्रोणप्रीतिकर्ता दधिभाण्डविभेदनः।
दामोदरोभक्तवश्यो यमलार्जुनभञ्जनः॥ १६५॥

बृहद्वनमहाश्चर्यो वृन्दावनगतिप्रियः ।
वत्सघाती बालकेलिर्बकासुरनिषूदनः ॥ १६६ ॥
अरण्यभोक्ताऽप्यथवा बाललीलापरायणः ।
प्रोत्साहजनकश्चैवमघासुरनिषूदनः ॥ १६७ ॥
व्यालमोक्षप्रदः पुष्टो ब्रह्ममोहप्रवर्धनः ।
अनन्तमूर्तिः सर्वात्मा जङ्गमस्थावराकृतिः ॥ १६८ ॥
ब्रह्ममोहनकर्ता च स्तुत्य आत्मा सदाप्रियः ।
पौगण्डलीलाभिरतिर्गोचारणपरायणः ॥ १६९ ॥
वृदावनलतागुल्मवृक्षरूपनिरूपकः ।
नादब्रह्मप्रकटनो वयःप्रतिकृतिस्वनः ॥ १७० ॥
बर्हिनृत्यानुकरणो गोपालानुकृतिस्वनः ।
सदाचारप्रतिष्ठाता बलश्रमनिराकृतिः ॥ १७१ ॥
तरुमूलकृताशेषतल्पशायी सखिस्तुतः ।
गोपालसेवितपदः श्रीलालितपदाम्बुजः ॥ १७२ ॥
गोपसम्प्रार्थितफलादाननाशितधेनुकः ।
कालीयफणिमाणिक्यरञ्जितश्रीपदाम्बुजः ॥ १७३ ॥
दृष्टिसञ्जीविताशेषगोपगोगोपिकाप्रियः ।
लीलासम्पीतदावाग्निः प्रलम्बवधपण्डितः ॥ १७४ ॥
दावाग्न्यावृतगोपालदृष्ट्याच्छादनवह्निपः ।
वर्षाशरद्विभेतिश्रीर्गोपीकामप्रबोधकः ॥ १७५ ॥
गोपीरत्नस्तुताशेषवेणुवाद्यविशारदः ।
कात्यायनीव्रतव्याजसर्वभावाश्रिताङ्गनः ॥ १७६ ॥
सत्सङ्गतिस्तुतिव्याजस्तुतवृन्दावनाङ्घ्रिपः ।
गोपक्षुच्छान्तिसंव्याजविप्रभार्याप्रसादकृत् ॥ १७७ ॥

हेतुप्राप्तेन्द्रयागस्वकार्यगोसवबोधकः　।
शैलरूपकृताशेषरसभोगसुखावहः　॥ १७८ ॥
लीलागोवर्धनोद्धारपालितस्वव्रजप्रियः　।
गोपस्वच्छन्दलीलार्थगर्गवाक्यार्थबोधकः　॥ १७९ ॥
इन्द्रधेनुस्तुतिप्राप्तगोविन्देन्द्राभिधानवान्　।
व्रतादिधर्मसंसक्तनन्दक्लेशविनाशकः　॥ १८० ॥
नन्दादिगोपमात्रेष्टवैकुण्ठगतिदायकः　।
वेणुवादस्मरक्षोभमत्तगोपीविमुक्तिदः　॥ १८१ ॥
सर्वभावप्राप्तगोपीसुखसंवर्धनक्षमः　।
गोपीगर्वप्रणाशार्थतिरोधानसुखप्रदः　॥ १८२ ॥
कृष्णाभावव्याप्तविश्वगोपीभावितवेशधृक्　।
राधाविशेषसम्भोगप्राप्तदोषनिवारकः　॥ १८३ ॥
परमप्रीतिसङ्गीतसर्वाद्भुतमहागुणः　।
मानापनोदनाक्रन्दगोपीदृष्टिमहोत्सवः　॥ १८४ ॥
गोपिकाव्याप्तसर्वाङ्गः स्त्रीसम्भाषाविशारदः　।
रासोत्सवमहासौख्यगोपीसम्भोगसागरः　॥ १८५ ॥
जलस्थलरतिव्याप्तगोपीदृष्ट्याभिपूजितः　।
शास्त्रानपेक्षकामैकमुक्तिद्वारविवर्धनः　॥ १८६ ॥
सुदर्शनमहासर्पग्रस्तनन्दविमोचकः　।
गीतमोहितगोपीधृक्शङ्खचूडविनाशकः　॥ १८७ ॥
गुणसङ्गीतसन्तुष्टिर्गोपीसंसारविस्मृतिः　।
अरिष्टमथनो दैत्यबुद्धिव्यामोहकारकः ॥ १८८ ॥
केशिघाती नारदेष्टो व्योमासुरविनाशकः ।
अक्रूरभक्तिसंराद्धपादरेणुमहानिधिः　॥ १८९ ॥

रथावरोहशुद्धात्मा गोपिमानसहारकः ।
ह्रदसन्दर्शिताशेषवैकुण्ठाक्रूरसंस्तुतः ॥ १९० ॥
मथुरागमनोत्साहो मथुराभाग्यभाजनम् ।
मथुरानगरीशोभादर्शनोत्सुकमानसः ॥ १९१ ॥
दुष्टरञ्जकघाती च वायकार्चितविग्रहः ।
वस्त्रमालासुशोभाङ्गः कुब्जालेपनभूषितः ॥ १९२ ॥
कुब्जासुरूपकर्ता च कुब्जारतिवरप्रदः ।
प्रसादरूपसन्तुष्टोहरकोदण्डखण्डनः ॥ १९३ ॥
शकलाहतकंसाप्तधनूरक्षकसैनिकः ।
जाग्रत्स्वप्नभयव्याप्तमृत्युलक्षणबोधकः ॥ १९४ ॥
मथुरामल्ल ओजस्वी मल्लयुद्धविशारदः ।
सद्यः कुवलयापीडघाती चाणूरमर्दनः ॥ १९५ ॥
लीलाहतमहामल्लः शलतोशलघातकः ।
कंसान्तको जितामित्रो वसुदेवविमोचकः ॥ १९६ ॥
ज्ञाततत्त्वपितृज्ञानमोहनामृतवाङ्मयः ।
उग्रसेनप्रतिष्ठाता यादवाधिविनाशकः ॥ १९७ ॥
नन्दादिसान्त्वनकरो ब्रह्मचर्यव्रते स्थितः ।
गुरुशुश्रूषणपरो विद्यापारमितेश्वरः ॥ १९८ ॥
सान्दीपनिमृतापत्यदाता कालान्तकादिजित् ।
गोकुलाश्वासनपरो यशोदानन्दपोषकः ॥ १९९ ॥
गोपिकाविरहव्याजमनोगतिरतिप्रदः ।
समोद्धवभ्रमरवाक् गोपिकामोहनाशकः ॥ २०० ॥
कुब्जारतिप्रदोऽक्रूरपवित्रीकृतभूगृहः ।
पृथादुःखप्रणेता च पाण्डवानां सुखप्रदः ॥ २०१ ॥

(दशमस्कन्धीय-उत्तरार्धनामानि)

जरासन्धसमानीतसैन्यघातविचारकः ।
यवनव्याप्तमथुराजनदत्तकुशस्थलिः ॥ २०२ ॥
द्वारकाद्भुतनिर्माणविस्मायितसुरासुरः ।
मनुष्यमात्रभोगार्थभूम्यानीतेन्द्रवैभवः ॥ २०३ ॥
यवनव्याप्तमथुरानिर्गमानन्दविग्रहः ।
मुचुकुन्दमहाबोधयवनप्राणदर्पहा ॥ २०४ ॥
मुचुकुन्दस्तुताशेषगुणकर्ममहोदयः ।
फलप्रदानसन्तुष्टिर्जन्मान्तरितमोक्षदः ॥ २०५ ॥
शिवब्राह्मणवाक्याप्तजयभीतिविभावनः ।
प्रवर्षणप्रार्थिताग्निदानपुण्यमहोत्सवः ॥ २०६ ॥
रुक्मिणीरमणः कामपिता प्रद्युम्नभावनः ।
स्यमन्तकमणिव्याजप्राप्तजाम्बवतीपतिः ॥ २०७ ॥
सत्यभामाप्राणपतिः कालिन्दीरतिवर्धनः ।
मित्रविन्दापतिः सत्यापतिर्वृषनिषूदनः ॥ २०८ ॥
भद्रावाञ्छितभर्ता च लक्ष्मणावरणक्षमः ।
इन्द्रादिप्रार्थितवधनरकासुरसूदनः ॥ २०९ ॥
मुरारिः पीठहन्ता च ताम्रादिप्राणहारकः ।
षोडशस्त्रीसहस्त्रेशश्छत्रकुण्डलदानकृत् ॥ २१० ॥
पारिजातापहरणो देवेन्द्रमदनाशकः ।
रुक्मिणीसमसर्वस्त्रीसाध्यभोगरतिप्रदः ॥ २११ ॥
रुक्मिणीपरिहासोक्तिवाक्तिरोधानकारकः ।
पुत्रपौत्रमहाभाग्यगृहधर्मप्रदर्शकः ॥ २१२ ॥
शम्बरान्तकसत्पुत्रविवाहहतरुक्मिकः ।
उषापहृतपौत्रश्रीर्बाणबाहुनिवारकः ॥ २१३ ॥

शीतज्वरभयव्याप्तज्वरसंस्तुतषड्गुणः ।
शङ्करप्रतियोद्धा च द्वन्द्वयुद्धविशारदः ॥ २१४ ॥
नृगपापप्रभेत्ता च ब्रह्मस्वगुणदोषदृक् ।
विष्णुभक्तिविरोधैकब्रह्मस्वविनिवारकः ॥ २१५ ॥
बलभद्राहितगुणो गोकुलप्रीतिदायकः ।
गोपीस्नेहैकनिलयो गोपीप्राणस्थितिप्रदः ॥ २१६ ॥
वाक्यातिगामीयमुनाहलाकर्षणवैभवः ।
पौण्ड्रकत्याजितस्पर्धः काशिराजविभेदनः ॥ २१७ ॥
काशीनिदाहकरणः शिवभस्मप्रदायकः ।
द्विविदप्राणघाती च कौरवाखर्वगर्वनुत् ॥ २१८ ॥
लाङ्गलाकृष्टनगरीसंविग्नाखिलनागरः ।
प्रपन्नाभयदः साम्बप्राप्तसन्मानभाजनम् ॥ २१९ ॥
नारदान्विष्टचरणो भक्तिविक्षेपनाशकः ।
सदाचारैकनिलयः सुधर्माध्यासितासनः ॥ २२० ॥
जरासन्धावरुद्धेन विज्ञापितनिजक्लमः ।
मन्त्र्युद्धवादिवाक्योक्तप्रकारैकपरायणः ॥ २२१ ॥
राजसूयादिमखकृत्सम्प्रार्थितसहायकृत् ।
इन्द्रप्रस्थप्रयाणार्थमहत्सम्भारसम्भृतिः ॥ २२२ ॥
जरासन्धवधव्याजमोचिताशेषभूमिपः ।
सन्मार्गबोधको यज्ञक्षितिवारणतत्परः ॥ २२३ ॥
शिशुपालहतिव्याजजयशापविमोचकः ।
दुर्योधनाभिमानाब्धिशोषबाणवृकोदरः ॥ २२४ ॥
महादेववरप्राप्तपुरशाल्वविनाशकः ।
दन्तवक्त्रवधव्याजविजयाघौघनाशकः ॥ २२५ ॥

विदूरथप्राणहर्ता न्यस्तशस्त्रास्त्रविग्रहः ।
उपधर्मविलिप्ताङ्गसूतघाती वरप्रदः ॥ २२६ ॥
बल्वलप्राणहरणपालितर्षिश्रुतिक्रियः ।
सर्वतीर्थाघनाशार्थतीर्थयात्राविशारदः ॥ २२७ ॥
ज्ञानक्रियाविभेदेष्टफलसाधनतत्परः ।
सारथ्यादिक्रियाकर्ता भक्तवश्यत्वबोधकः ॥ २२८ ॥
सुदामरङ्कभार्यार्थभूम्यानीतेन्द्रवैभवः ।
रविग्रहनिमित्ताप्तकुरुक्षेत्रैकपावनः ॥ २२९ ॥
नृपगोपसमस्तस्त्रीपावनार्थाखिलक्रियः ।
ऋषिमार्गप्रतिष्ठाता वसुदेवमखप्रियः ॥ २३० ॥
वसुदेवज्ञानदाता देवकीपुत्रदायकः ।
अर्जुनस्त्रीप्रदाता च बहुलाश्वस्वरूपदः ॥ २३१ ॥
श्रुतदेवेष्टदाता च सर्वश्रुतिनिरूपितः ।
महादेवाद्यतिश्रेष्ठो भक्तिलक्षणनिर्णयः ॥ २३२ ॥
वृकग्रस्तशिवत्राता नानावाक्यविशारदः ।
नरगर्वविनाशार्थहृतब्राह्मणबालकः ॥ २३३ ॥
लोकालोकपरस्थानस्थितबालकदायकः ।
द्वारकास्थमहाभोगनानास्त्रीरतिवर्धनः ॥ २३४ ॥
मनस्तिरोधानकृतव्यग्रस्त्रीचित्तभावितः ।

(एकादशस्कन्धीयनामानि)

मुक्तिलीलाविहरणो मौसलव्याजसंहृतिः ॥ २३५ ॥
श्रीभागवतधर्मादिबोधको भक्तिनीतिकृत् ।
उद्धवज्ञानदाता च पञ्चविंशतिधागुरुः ॥ २३६ ॥

आचारमुक्तिभक्त्यादिवक्ता शब्दोद्भवस्थितिः ।
हंसो धर्मप्रवक्ता च सनकाद्युपदेशकृत् ॥ २३७ ॥
भक्तिसाधनवक्ता च योगसिद्धिप्रदायकः ।
नानाविभूतिवक्ता च शुद्धधर्मावबोधकः ॥ २३८ ॥
मार्गत्रयविभेदात्मा नानाशङ्कानिवारकः ।
भिक्षुगीताप्रवक्ता च शुद्धसांख्यप्रवर्तकः ॥ २३९ ॥
मनोगुणविशेषात्मा ज्ञापकोक्तपुरूरवाः ।
पूजाविधिप्रवक्ता च सर्वसिद्धान्तबोधकः ॥ २४० ॥
लघुस्वमार्गवक्ता च स्वस्थानगतिबोधकः ।
यादवांगोपसंहर्ता सर्वाश्चर्यगतिक्रियः ॥ २४१ ॥

(द्वादशस्कन्धीयनामानि)

कालाधर्मविभेदार्थवर्णनाशनतत्परः ।
बुद्धो गुप्तार्थवक्ता च नानाशास्त्रविधायकः ॥ २४२ ॥
नष्टधर्ममनुष्यादिलक्षणज्ञापनोत्सुकः ।
आश्रयैकगतिज्ञाता कल्किः कलिमलापहः ॥ २४३ ॥
शास्त्रवैराग्यसम्बोधो नानाप्रलयबोधकः ।
विशेषतः शुकव्याजपरीक्षिज्ज्ञानबोधकः ॥ २४४ ॥
शुकेष्टगतिरूपात्मा परीक्षिद्देहमोक्षदः ।
शब्दरूपो नादरूपो वेदरूपो विभेदनः ॥ २४५ ॥
व्यासः शाखाप्रवक्ता च पुराणार्थप्रवर्तकः ।
मार्कण्डेयप्रसन्नात्मा वटपत्रपुटेशयः ॥ २४६ ॥
मायाव्याप्तमहामोहदुःखशान्तिप्रवर्तकः ।
महादेवस्वरूपश्च भक्तिदाता कृपानिधिः ॥ २४७ ॥

आदित्यान्तर्गतः कालो द्वादशात्मासुपूजितः।
श्रीभागवतरूपश्च सर्वार्थफलदायकः॥ २४८॥
इतीदं कीर्तनीयस्य हरेर्नामसहस्रकम्।
पञ्चसप्ततिविस्तीर्णं पुराणान्तरभाषितम्॥ २४९॥
य एतत्प्रातरुत्थाय श्रद्धावान् सुसमाहितः।
जपेदर्थाहितमतिः स गोविन्दपदं व्रजेत्॥ २५०॥
सर्वधर्मविनिर्मुक्तः सर्वसाधनवर्जितः।
एतद्धारणमात्रेण कृष्णस्य पदवीं व्रजेत्॥ २५१॥
हर्यावेशितचित्तेन श्रीभागवतसागरात्।
समुद्धृतानि नामानि चिन्तामणिनिभानि हि॥ २५२॥
कण्ठस्थितान्यर्थदीप्त्या बाधन्तेऽज्ञानजं तमः।
भक्तिं श्रीकृष्णदेवस्य साधयन्ति विनिश्चितम्॥ २५३॥
किं बहूक्तेन भगवान् नामभिः स्तुतषड्गुणः।
आत्मभावं नयत्याशु भक्तिं च कुरुते दृढाम्॥ २५४॥
यः कृष्णभक्तिमिह वाञ्छति साधनौघै-
र्नामानि भासुरयशशांसि जपेत्स नित्यम्।
तं वै हरिः स्वपुरुषं कुरुतेऽतिशीघ्र-
मात्मार्पणं समधिगच्छति भावतुष्टः॥ २५५॥
श्रीकृष्ण कृष्णसख वृष्णिवृषावनिध्रुग्-
राजन्यवंशदहनानपवर्गवीर्य ।
गोविन्द गोपवनिताव्रजभृत्यगीत
तीर्थश्रवः श्रवणमङ्गल पाहि भृत्यान्॥ २५६॥

॥ इति श्रीभागवतसारसमुच्चये वैश्वानरोक्तपुरुषोत्तमनामसहस्रं सम्पूर्णम्॥

श्रीपुरुषोत्तमसहस्त्रनामावलिः

१ ॐ नमो भगवते श्रीकृष्णाय नमः।
२ ॐ नमो भगवते सच्चिदानन्दाय नमः।
३ ॐ नमो भगवते नित्यलीलाविनोदकृते नमः।
४ ॐ नमो भगवते सर्वागमविनोदिने नमः।
५ ॐ नमो भगवते लक्ष्मीशाय नमः।
६ ॐ नमो भगवते पुरुषोत्तमाय नमः।
७ ॐ नमो भगवते आदिकालाय नमः।
८ ॐ नमो भगवते सर्वकालाय नमः।
९ ॐ नमो भगवते कालात्मने नमः।
१० ॐ नमो भगवते माययावृताय नमः।
११ ॐ नमो भगवते भक्तोद्धारप्रयत्नात्मने नमः।
१२ ॐ नमो भगवते जगत्कर्त्रे नमः।
१३ ॐ नमो भगवते जगन्मयाय नमः।
१४ ॐ नमो भगवते नामलीलापराय नमः।
१५ ॐ नमो भगवते विष्णवे नमः।
१६ ॐ नमो भगवते व्यासात्मने नमः।
१७ ॐ नमो भगवते शुकमोक्षदाय नमः।
१८ ॐ नमो भगवते व्यापिवैकुण्ठदात्रे नमः।
१९ ॐ नमो भगवते श्रीमद्भागवतागमाय नमः।
२० ॐ नमो भगवते शुकवागमृताब्धीन्दवे नमः।
२१ ॐ नमो भगवते शौनकाद्यखिलेष्टदाय नमः।
२२ ॐ नमो भगवते भक्तिप्रवर्तकाय नमः।
२३ ॐ नमो भगवते त्रात्रे नमः।
२४ ॐ नमो भगवते व्यासचिन्ताविनाशकाय नमः।
२५ ॐ नमो भगवते सर्वसिद्धान्तवागात्मने नमः।
२६ ॐ नमो भगवते नारदाद्यखिलेष्टदाय नमः।

२७ ॐ नमो भगवते अन्तरात्मने नमः।
२८ ॐ नमो भगवते ध्यानगम्याय नमः।
२९ ॐ नमो भगवते भक्तिरत्नप्रदायकाय नमः।
३० ॐ नमो भगवते मुक्तोपसृप्याय नमः।
३१ ॐ नमो भगवते पूर्णात्मने नमः।
३२ ॐ नमो भगवते मुक्तानां रतिवर्धनाय नमः।
३३ ॐ नमो भगवते भक्तकार्यैकनिरताय नमः।
३४ ॐ नमो भगवते द्रौण्यस्त्रविनिवारकाय नमः।
३५ ॐ नमो भगवते भक्तस्मयप्रणेत्रे नमः।
३६ ॐ नमो भगवते भक्तवाक्परिपालकाय नमः।
३७ ॐ नमो भगवते ब्रह्मण्यदेवाय नमः।
३८ ॐ नमो भगवते धर्मात्मने नमः।
३९ ॐ नमो भगवते भक्तानां परीक्षकाय नमः।
४० ॐ नमो भगवते आसन्नहितकर्त्रे नमः।
४१ ॐ नमो भगवते मायाहितकराय नमः।
४२ ॐ नमो भगवते प्रभवे नमः।
४३ ॐ नमो भगवते उत्तराप्राणदात्रे नमः।
४४ ॐ नमो भगवते ब्रह्मास्त्रविनिवारकाय नमः।
४५ ॐ नमो भगवते सर्वतः पाण्डवपतये नमः।
४६ ॐ नमो भगवते परीक्षिच्छुद्धिकारणाय नमः।
४७ ॐ नमो भगवते सर्ववेदेषु गूढात्मने नमः।
४८ ॐ नमो भगवते भक्तैकहृदयङ्गमाय नमः।
४९ ॐ नमो भगवते कुन्तीस्तुत्याय नमः।
५० ॐ नमो भगवते प्रसन्नात्मने नमः।
५१ ॐ नमो भगवते परमाद्भुतकार्यकृते नमः।
५२ ॐ नमो भगवते भीष्ममुक्तिप्रदाय नमः।
५३ ॐ नमो भगवते स्वामिने नमः।
५४ ॐ नमो भगवते भक्तमोहनिवारकाय नमः।

५५ ॐ नमो भगवते सर्वावस्थासु संसेव्याय नमः।
५६ ॐ नमो भगवते समाय नमः।
५७ ॐ नमो भगवते सुखहितप्रदाय नमः।
५८ ॐ नमो भगवते कृतकृत्याय नमः।
५९ ॐ नमो भगवते सर्वसाक्षिणे नमः।
६० ॐ नमो भगवते भक्तश्रीरतिवर्धनाय नमः।
६१ ॐ नमो भगवते सर्वसौभाग्यनिलयाय नमः।
६२ ॐ नमो भगवते परमाश्चर्यरूपधृजे नमः।
६३ ॐ नमो भगवते अनन्यपुरुषस्वामिने नमः।
६४ ॐ नमो भगवते द्वारकाभाग्यभाजनाय नमः।
६५ ॐ नमो भगवते बीजसंस्कारकर्त्रे नमः।
६६ ॐ नमो भगवते परीक्षिज्ज्ञानपोषकाय नमः।
६७ ॐ नमो भगवते सर्वत्र पूर्णगुणकाय नमः।
६८ ॐ नमो भगवते सर्वभूषणभूषिताय नमः।
६९ ॐ नमो भगवते सर्वलक्षणदात्रे नमः।
७० ॐ नमो भगवते धृतराष्ट्रविमुक्तिदाय नमः।
७१ ॐ नमो भगवते नित्यं सन्मार्गरक्षकाय नमः।
७२ ॐ नमो भगवते विदुरप्रीतिपूरकाय नमः।
७३ ॐ नमो भगवते लीलाव्यामोहकर्त्रे नमः।
७४ ॐ नमो भगवते कालधर्मप्रवर्तकाय नमः।
७५ ॐ नमो भगवते पाण्डवानां मोक्षदात्रे नमः।
७६ ॐ नमो भगवते परीक्षिद्भाग्यवर्धनाय नमः।
७७ ॐ नमो भगवते कलिनिग्रहकर्त्रे नमः।
७८ ॐ नमो भगवते धर्मादीनां पोषकाय नमः।
७९ ॐ नमो भगवते सत्सङ्गज्ञानहेतवे नमः।
८० ॐ नमो भगवते श्रीभागवतकारणाय नमः।
८१ ॐ नमो भगवते प्राकृतादृष्टमार्गाय नमः।
८२ ॐ नमो भगवते सकलागमैः श्रोतव्याय नमः।
८३ ॐ नमो भगवते शुद्धभावैः कीर्तितव्याय नमः।

८४ ॐ नमो भगवते आत्मवित्तमैः स्मर्तव्याय नमः।
८५ ॐ नमो भगवते अनेकमार्गकर्त्रे नमः।
८६ ॐ नमो भगवते नानाविधगतिप्रदाय नमः।
८७ ॐ नमो भगवते पुरुषाय नमः।
८८ ॐ नमो भगवते सकलाधाराय नमः।
८९ ॐ नमो भगवते सत्वैकनिलयात्मभुवे नमः।
९० ॐ नमो भगवते सर्वध्येयाय नमः।
९१ ॐ नमो भगवते योगगम्याय नमः।
९२ ॐ नमो भगवते भक्तिग्राह्याय नमः।
९३ ॐ नमो भगवते सुरप्रियाय नमः।
९४ ॐ नमो भगवते जन्मादिसार्थककृत्ये नमः।
९५ ॐ नमो भगवते लीलाकर्त्रे नमः।
९६ ॐ नमो भगवते सतांपतये नमः।
९७ ॐ नमो भगवते आदिकर्त्रे नमः।
९८ ॐ नमो भगवते सत्त्वकर्त्रे नमः।
९९ ॐ नमो भगवते सर्वकर्त्रे नमः।
१०० ॐ नमो भगवते विशारदाय नमः।
१०१ ॐ नमो भगवते नानावतारकर्त्रे नमः।
१०२ ॐ नमो भगवते ब्रह्माविर्भावकारणाय नमः।
१०३ ॐ नमो भगवते दशलीलाविनोदिने नमः।
१०४ ॐ नमो भगवते नानासृष्टिप्रवर्तकाय नमः।
१०५ ॐ नमो भगवते अनेककल्पकर्त्रे नमः।
१०६ ॐ नमो भगवते सर्वदोषविवर्जिताय नमः।
१०७ ॐ नमो भगवते वैराग्यहेतवे नमः।
१०८ ॐ नमो भगवते तीर्थात्मने नमः।
१०९ ॐ नमो भगवते सर्वतीर्थफलप्रदाय नमः।
११० ॐ नमो भगवते तीर्थशुद्धैकनिलयाय नमः।
१११ ॐ नमो भगवते स्वमार्गपरिपोषकाय नमः।
११२ ॐ नमो भगवते तीर्थकीर्तये नमः।

११३ ॐ नमो भगवते भक्तगम्याय नमः।
११४ ॐ नमो भगवते भक्तानुशयकार्यकृते नमः।
११५ ॐ नमो भगवते भक्ततुल्याय नमः।
११६ ॐ नमो भगवते सर्वतुल्याय नमः।
११७ ॐ नमो भगवते स्वेच्छासर्वप्रवर्तकाय नमः।
११८ ॐ नमो भगवते गुणातीताय नमः।
११९ ॐ नमो भगवते अनवद्यात्मने नमः।
१२० ॐ नमो भगवते सर्गलीलाप्रवर्तकाय नमः।
१२१ ॐ नमो भगवते साक्षात् सर्वजगत्कर्त्रे नमः।
१२२ ॐ नमो भगवते महदादिप्रवर्तकाय नमः।
१२३ ॐ नमो भगवते मायाप्रवर्तकाय नमः।
१२४ ॐ नमो भगवते साक्षिणे नमः।
१२५ ॐ नमो भगवते मायरतिविवर्धनाय नमः।
१२६ ॐ नमो भगवते आकाशात्मने नमः।
१२७ ॐ नमो भगवते चतुर्मूर्तये नमः।
१२८ ॐ नमो भगवते चतुर्धा भूतभावनाय नमः।
१२९ ॐ नमो भगवते रजःप्रवर्तकाय नमः।
१३० ॐ नमो भगवते ब्रह्मणे नमः।
१३१ ॐ नमो भगवते मरीच्यादिपितामहाय नमः।
१३२ ॐ नमो भगवते वेदकर्त्रे नमः।
१३३ ॐ नमो भगवते यज्ञकर्त्रे नमः।
१३४ ॐ नमो भगवते सर्वकर्त्रे नमः।
१३५ ॐ नमो भगवते अमितात्मकाय नमः।
१३६ ॐ नमो भगवते अनेकसृष्टिकर्त्रे नमः।
१३७ ॐ नमो भगवते दशधासृष्टिकारकाय नमः।
१३८ ॐ नमो भगवते यज्ञाङ्गाय नमः।
१३९ ॐ नमो भगवते यज्ञवाराहाय नमः।
१४० ॐ नमो भगवते भूधराय नमः।
१४१ ॐ नमो भगवते भूमिपालकाय नमः।

१४२ ॐ नमो भगवते सेतवे नमः।
१४३ ॐ नमो भगवते विधरणाय नमः।
१४४ ॐ नमो भगवते जैत्राय नमः।
१४५ ॐ नमो भगवते हिरण्याक्षान्तकाय नमः।
१४६ ॐ नमो भगवते सुराय नमः।
१४७ ॐ नमो भगवते दितिकश्यपकामैकहेतुसृष्टिप्रवर्तकाय नमः।
१४८ ॐ नमो भगवते देवाभयप्रदात्रे नमः।
१४९ ॐ नमो भगवते वैकुण्ठाधिपतये नमः।
१५० ॐ नमो भगवते महते नमः।
१५१ ॐ नमो भगवते सर्वगर्वप्रहारिणे नमः।
१५२ ॐ नमो भगवते सनकाद्यखिलार्थदाय नमः।
१५३ ॐ नमो भगवते सर्वाश्वासनकर्त्रे नमः।
१५४ ॐ नमो भगवते भक्ततुल्याहवप्रदाय नमः।
१५५ ॐ नमो भगवते काललक्षणहेतवे नमः।
१५६ ॐ नमो भगवते सवार्थज्ञापकाय नमः।
१५७ ॐ नमो भगवते पराय नमः।
१५८ ॐ नमो भगवते भक्तोन्नतिकराय नमः।
१५९ ॐ नमो भगवते सर्वप्रकारसुखदायकाय नमः।
१६० ॐ नमो भगवते नानायुद्धप्रहरणाय नमः।
१६१ ॐ नमो भगवते ब्रह्मशापविमोचकाय नमः।
१६२ ॐ नमो भगवते पुष्टिसर्गप्रणेत्रे नमः।
१६३ ॐ नमो भगवते गुणसृष्टिप्रवर्तकाय नमः।
१६४ ॐ नमो भगवते कर्दमेष्टप्रदात्रे नमः।
१६५ ॐ नमो भगवते देवहूत्यखिलार्थदाय नमः।
१६६ ॐ नमो भगवते शुक्लनारायणाय नमः।
१६७ ॐ नमो भगवते सत्याय नमः।
१६८ ॐ नमो भगवते कालधर्मप्रवर्तकाय नमः।
१६९ ॐ नमो भगवते ज्ञानावताराय नमः।
१७० ॐ नमो भगवते शान्तात्मने नमः।

१७१ ॐ नमो भगवते कपिलाय नमः।
१७२ ॐ नमो भगवते कालनाशकाय नमः।
१७३ ॐ नमो भगवते त्रिगुणाधिपतये नमः।
१७४ ॐ नमो भगवते सांख्यशास्त्रकर्त्रे नमः।
१७५ ॐ नमो भगवते विशारदाय नमः।
१७६ ॐ नमो भगवते सर्गदूषणहारिणे नमः।
१७७ ॐ नमो भगवते पुष्टिमोक्षप्रवर्तकाय नमः।
१७८ ॐ नमो भगवते लौकिकानन्ददात्रे नमः।
१७९ ॐ नमो भगवते ब्रह्मानन्दप्रवर्तकाय नमः।
१८० ॐ नमो भगवते भक्तिसिद्धान्तवक्त्रे नमः।
१८१ ॐ नमो भगवते सगुणज्ञानदीपकाय नमः।
१८२ ॐ नमो भगवते आत्मप्रदाय नमः।
१८३ ॐ नमो भगवते पूर्णकामाय नमः।
१८४ ॐ नमो भगवते योगात्मने नमः।
१८५ ॐ नमो भगवते योगभाविताय नमः।
१८६ ॐ नमो भगवते जीवन्मुक्तिप्रदाय नमः।
१८७ ॐ नमो भगवते श्रीमते नमः।
१८८ ॐ नमो भगवते अनन्यभक्तिप्रवर्तकाय नमः।
१८९ ॐ नमो भगवते कालसामर्थ्यदात्रे नमः।
१९० ॐ नमो भगवते कालदोषनिवारकाय नमः।
१९१ ॐ नमो भगवते गर्भोत्तमज्ञानदात्रे नमः।
१९२ ॐ नमो भगवते कर्ममार्गनियामकाय नमः।
१९३ ॐ नमो भगवते सर्वमार्गनिराकर्त्रे नमः।
१९४ ॐ नमो भगवते भक्तिमार्गैकपोषकाय नमः।
१९५ ॐ नमो भगवते सिद्धिहेतवे नमः।
१९६ ॐ नमो भगवते सर्वहेतवे नमः।
१९७ ॐ नमो भगवते सर्वाश्चर्यैककारणाय नमः।
१९८ ॐ नमो भगवते चेतनाचेतनपतये नमः।
१९९ ॐ नमो भगवते समुद्रपरिपूजिताय नमः।

२०० ॐ नमो भगवते सांख्याचार्यस्तुताय नमः।
२०१ ॐ नमो भगवते सिद्धपूजिताय नमः।
२०२ ॐ नमो भगवते सर्वपूजिताय नमः।
२०३ ॐ नमो भगवते विसर्गकर्त्रे नमः।
२०४ ॐ नमो भगवते सर्वेशाय नमः।
२०५ ॐ नमो भगवते कोटिसूर्यसमप्रभाय नमः।
२०६ ॐ नमो भगवते अनन्तगुणगम्भीराय नमः।
२०७ ॐ नमो भगवते महापुरुषपूजिताय नमः।
२०८ ॐ नमो भगवते अनन्तसुखदात्रे नमः।
२०९ ॐ नमो भगवते ब्रह्मकोटिप्रजापतये नमः।
२१० ॐ नमो भगवते सुधाकोटिस्वास्थ्यहेतवे नमः।
२११ ॐ नमो भगवते कामधुक्कोटिकामदाय नमः।
२१२ ॐ नमो भगवते समुद्रकोटिगम्भीराय नमः।
२१३ ॐ नमो भगवते तीर्थकोटिसमाह्वयाय नमः।
२१४ ॐ नमो भगवते सुमेरुकोटिनिष्कम्पाय नमः।
२१५ ॐ नमो भगवते कोटिब्रह्माण्डविग्रहाय नमः।
२१६ ॐ नमो भगवते कोट्यश्वमेधपापघ्नाय नमः।
२१७ ॐ नमो भगवते वायुकोटिमहाबलाय नमः।
२१८ ॐ नमो भगवते कोटीन्दुजगदानन्दिने नमः।
२१९ ॐ नमो भगवते शिवकोटिप्रसादकृते नमः।
२२० ॐ नमो भगवते सर्वसद्गुणमाहात्म्याय नमः।
२२१ ॐ नमो भगवते सर्वसद्गुणभाजनाय नमः।
२२२ ॐ नमो भगवते मन्वादिप्रेरकाय नमः।
२२३ ॐ नमो भगवते धर्माय नमः।
२२४ ॐ नमो भगवते यज्ञनारायणाय नमः।
२२५ ॐ नमो भगवते पराय नमः।
२२६ ॐ नमो भगवते आकूतिसूनवे नमः।
२२७ ॐ नमो भगवते देवेन्द्राय नमः।
२२८ ॐ नमो भगवते रुचिजन्मने नमः।

२२९ ॐ नमो भगवते अभयप्रदाय नमः।
२३० ॐ नमो भगवते दक्षिणापतये नमः।
२३१ ॐ नमो भगवते ओजस्विने नमः।
२३२ ॐ नमो भगवते क्रियाशक्तये नमः।
२३३ ॐ नमो भगवते परायणाय नमः।
२३४ ॐ नमो भगवते दत्तात्रेयाय नमः।
२३५ ॐ नमो भगवते योगपतये नमः।
२३६ ॐ नमो भगवते योगमार्गप्रवर्तकाय नमः।
२३७ ॐ नमो भगवते अनसूयागर्भरत्नाय नमः।
२३८ ॐ नमो भगवते ऋषिवंशविवर्धनाय नमः।
२३९ ॐ नमो भगवते गुणत्रयविभागज्ञाय नमः।
२४० ॐ नमो भगवते चतुर्वर्गविशारदाय नमः।
२४१ ॐ नमो भगवते नारायणाय नमः।
२४२ ॐ नमो भगवते धर्मसूनवे नमः।
२४३ ॐ नमो भगवते मूर्तिपुण्ययशस्कराय नमः।
२४४ ॐ नमो भगवते सहस्त्रकवचच्छेदिने नमः।
२४५ ॐ नमो भगवते तपःसाराय नमः।
२४६ ॐ नमो भगवते नरप्रियाय नमः।
२४७ ॐ नमो भगवते विश्वानन्दप्रदाय नमः।
२४८ ॐ नमो भगवते कर्मसाक्षिणे नमः।
२४९ ॐ नमो भगवते भारतपूजिताय नमः।
२५० ॐ नमो भगवते अनन्ताद्भुतमाहात्म्याय नमः।
२५१ ॐ नमो भगवते बदरीस्थानभूषणाय नमः।
२५२ ॐ नमो भगवते जितकामाय नमः।
२५३ ॐ नमो भगवते जितक्रोधाय नमः।
२५४ ॐ नमो भगवते जितसङ्गाय नमः।
२५५ ॐ नमो भगवते जितेन्द्रियाय नमः।
२५६ ॐ नमो भगवते उर्वशीप्रभवाय नमः।
२५७ ॐ नमो भगवते स्वर्गसुखदायिने नमः।

२५८ ॐ नमो भगवते स्थितिप्रदाय नमः।
२५९ ॐ नमो भगवते अमानिने नमः।
२६० ॐ नमो भगवते मानदाय नमः।
२६१ ॐ नमो भगवते गोप्त्रे नमः।
२६२ ॐ नमो भगवते भगवच्छास्त्रबोधकाय नमः।
२६३ ॐ नमो भगवते ब्रह्मादिवन्द्याय नमः।
२६४ ॐ नमो भगवते हंसाय नमः।
२६५ ॐ नमो भगवते श्रियै नमः।
२६६ ॐ नमो भगवते मायावैभवकारणाय नमः।
२६७ ॐ नमो भगवते विविधानन्तसर्गात्मने नमः।
२६८ ॐ नमो भगवते विश्वपूरणतत्पराय नमः।
२६९ ॐ नमो भगवते यज्ञजीवनहेतवे नमः।
२७० ॐ नमो भगवते यज्ञस्वामिने नमः।
२७१ ॐ नमो भगवते इष्टबोधकाय नमः।
२७२ ॐ नमो भगवते नानासिद्धान्तगम्याय नमः।
२७३ ॐ नमो भगवते सप्ततन्तवे नमः।
२७४ ॐ नमो भगवते षड्गुणाय नमः।
२७५ ॐ नमो भगवते प्रतिसर्गजगत्कर्त्रे नमः।
२७६ ॐ नमो भगवते नानालीलाविशारदाय नमः।
२७७ ॐ नमो भगवते ध्रुवप्रियाय नमः।
२७८ ॐ नमो भगवते ध्रुवस्वामिने नमः।
२७९ ॐ नमो भगवते चिन्तिताधिकदायकाय नमः।
२८० ॐ नमो भगवते दुर्लभानन्तफलदाय नमः।
२८१ ॐ नमो भगवते दयानिधये नमः।
२८२ ॐ नमो भगवते अमित्रघ्ने नमः।
२८३ ॐ नमो भगवते अङ्गस्वामिने नमः।
२८४ ॐ नमो भगवते कृपासाराय नमः।
२८५ ॐ नमो भगवते वैन्याय नमः।
२८६ ॐ नमो भगवते भूमिनियामकाय नमः।

२८७ ॐ नमो भगवते भूमिदोग्ध्रे नमः।
२८८ ॐ नमो भगवते प्रजाप्राणपालनैकपरायणाय नमः।
२८९ ॐ नमो भगवते यशोदात्रे नमः।
२९० ॐ नमो भगवते ज्ञानदात्रे नमः।
२९१ ॐ नमो भगवते सर्वधर्मप्रदर्शकाय नमः।
२९२ ॐ नमो भगवते पुरञ्जनाय नमः।
२९३ ॐ नमो भगवते जगन्मित्राय नमः।
२९४ ॐ नमो भगवते विसर्गान्तप्रदर्शकाय नमः।
२९५ ॐ नमो भगवते प्रचेतसां-पतये नमः।
२९६ ॐ नमो भगवते चित्रभक्तिहेतवे नमः।
२९७ ॐ नमो भगवते जनार्दनाय नमः।
२९८ ॐ नमो भगवते स्मृतिहेतवे नमः।
२९९ ॐ नमो भगवते ब्रह्मभावसायुज्यादिप्रदाय नमः।
३०० ॐ नमो भगवते शुभाय नमः।
३०१ ॐ नमो भगवते विजयिने नमः।
३०२ ॐ नमो भगवते स्थितिलीलाब्धये नमः।
३०३ ॐ नमो भगवते अच्युताय नमः।
३०४ ॐ नमो भगवते विजयप्रदाय नमः।
३०५ ॐ नमो भगवते स्वसामर्थ्यप्रदाय नमः।
३०६ ॐ नमो भगवते भक्तकीर्तिहेतवे नमः।
३०७ ॐ नमो भगवते अधोक्षजाय नमः।
३०८ ॐ नमो भगवते प्रियव्रतप्रियस्वामिने नमः।
३०९ ॐ नमो भगवते स्वेच्छावादविशारदाय नमः।
३१० ॐ नमो भगवते संग्यगम्याय नमः।
